**अष्टाङ्गमैथुन** न० कर्म्म० । "स्मरणं कीर्त्तनं केलिः प्रेक्षणम् गुह्यभाषणम् । संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः" इत्युक्ते स्त्रीणां स्मरणादिषु अष्टसु । यदभावो ब्रह्मचर्य्यम् ।

**अष्टाङ्गयोग** पु० अष्टावङ्गान्यस्य कर्म० । यमनियमाद्यष्टाङ्गे योगे स च अङ्गसहितोदर्शितः तन्त्रसारे । "ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः । तस्य स्नेहात् समाख्याता योगविघ्नकरास्तु ये । कामक्रोधलोभमोहमदमात्सर्य्यसंज्ञकाः । योगाङ्गैरेतान्निर्ज्जित्य योगिनो-योगमाप्नुयुः । यमनियमावासनं प्राणायामस्ततःपरम् । प्रत्याहारो धारणाख्यं ध्यानं सार्द्धं समाधिना । योगाङ्गान्याहुरेतानि योगिनो योगसाधने । यमादयस्तु "अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं दयार्ज्जवम् । क्षमा धृतिर्मिताहारः शौचञ्चेति यमा दश । तपःसन्तोष आस्तिक्यं दानं देवस्य पूजनम् । सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च जपोहुतम् । दशैते नियमाः प्रोक्तायोगशास्त्रविशारदैः । आसनानि आसनशब्दे वक्ष्यन्ते ।"इड़याकर्षयेद्वायुं बाह्यं षोड़शमात्रया । धारयेत् पूरितं योगी चतुःषष्ट्या तु मात्रया । सुषुम्णा मध्यगं, सम्यग्द्वात्रिंशन्मात्रया शनैः । नाड्या पिङ्गलया चैव रेचयेद्योगवित्तमः । प्राणायाममिमं प्राहुर्योगशास्त्रविशारदाः । भूयोभूयः क्रमात्तस्य व्यत्यासेन समाचरेत् । मात्रावृत्तिक्रमेणैव सम्यग्द्वादश षोड़श । जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः । तदपेतं निगर्भञ्च प्राणायामं परं विदुः । क्रमादभ्यस्यतः पुंसोदेह स्वेदोद्गमोऽधमः । मध्यमः कम्पसंयुक्तो भूमित्यागः परो-मतः । उत्तमस्य गुणावाप्तिर्य्यावच्छीलनमिष्यते" इन्द्रियाणां विचरतां विषयेषु निरर्गलम् । बलादाहरणं तेभ्यः प्रत्याहारोऽभिधीयते । अङ्गुष्ठगुल्फजानूरुसीमनी लिङ्गनाभिषु । हृद्ग्रीवाकण्ठदेशे तु लम्बिकायां तथा नसि । भ्रूमध्ये मस्तके मूर्द्ध्नि द्वादशान्ते यथाविधि । धारणं प्राणमरुतोधारणेति निगद्यते । समाहितेन मनसा चैतन्यान्तरवर्त्तिना । आत्मन्यभीष्टदेवानां ध्यानं ध्यानमिहोच्यते । समत्वभावनां नित्यं जीवात्मपरमात्मनोः । समाधिमाहुर्मुनयः प्रोक्तमष्टाङ्गलक्षणम् । इत्यादि कथितं दैवि कामादिरिपुनाशनम्" । पात०सू०तु अन्यथोक्तम् ।

**अष्टाङ्गावलेहिका** स्त्री कर्म्म० "कट्फलं पौष्करं शृङ्गी व्योसं यासस्य कारवी । श्लक्ष्णचूर्णकृतञ्चैतन्मधुना सह लेहयेत् । एषावलेहिका हन्ति सन्निपातं सुदारुणम् । हिक्काश्वासं च कासञ्च कण्ठरोगं नियच्छति । ऊर्द्ध्वगत्ने प्रहरणे उष्णे स्वेदादिकर्म्मणि । विरोध्युष्णे मधु त्यक्त्वा कार्य्या स्वादार्द्रजैरसैः" । चक्रदत्तोक्तेऽवलेहभेदे ।

**अष्टादश** त्रि० अष्टादशानां पूरणः डट् स्त्रियां ङीप् अष्टादशसंख्यापूरणे । अष्टौ च दश च अष्टाधिका दश वा अष्टादशन् । १ (आटारो) संख्यायाम् २ततसंख्याते च त्रि० । "विद्या ह्यष्टादशैव तु" विष्णुपु० "अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्" नैष० "अष्टादश पुराणानि कृत्वा सत्यवतीसुतः" भा०आ०प० ।

**अष्टादशधान्य** न०ब०व०कर्म०संज्ञात्वान्न द्विगुः । अष्टादशविधेषु धान्येषु । तानि च यथा । "यवगोधूमधान्यानि तिलाः कङ्गुकुलोत्थकाः । माषा मुद्गामसूराश्च निष्पावाः श्यामसर्षपाः । गवेधुकाश्च नीवारा आढ़क्योऽथ सतीनकाः । चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु हेमा० दा०ख०स्का० पु० । धान्यानि, व्रीहयः, गवेधुकाः, कसेरुकाः । नीवाराः आरण्यव्रीहयः सतीनका, वर्त्तुलकलायाः । चीनकाः षष्टिकविशेषाः । निष्पावाः शिम्बीभेदाः । हेमा० ।

**अष्टादशपरिशिष्टा** स्त्री ब०व० कर्म० संज्ञात्वान्न द्विगुः । यूपादिलक्षणादिषु अष्टादशसु परिशिष्टविद्यासु "परिशिष्टाश्च संख्याता अष्टादश शृणुष्व ताः । यूपलक्षणं छागलक्षणं प्रतिष्ठानुवाकसंख्याचरणव्यूहश्राद्धकल्पसूत्राणि परिषद्-ऋग्यजुषमिष्टकापूरणं प्रवराध्यायोक्थशास्त्रं क्रतुसंख्यानिगमा यज्ञपार्श्वहौत्रकम् । प्रतञ्च प्रसवोत्थाश्च कूर्म्मलक्षणसंयुतम् । कथिताः परिशिष्टास्तु द्व्यूनविंशति संख्यया" हेमा०दा०ख०देवीपु० ।

**अष्टादशपुराण** न०ब०व०कर्म्म०संज्ञात्वात् न द्विगुः । ब्राह्मादिषु अष्टादशसु पुराणेषु "ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा तथान्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमम् । आग्नेयमष्टमं प्रोक्तं भविष्यन्नवमन्तथा । दशमं ब्रह्मवैवर्त्तं लिङ्गमेकादशं तथा । वाराहं द्वादशं प्रोक्तं स्कान्दञ्चात्र त्रयोदशम् । चतुर्दशं वामनञ्च कौर्म्मम्पञ्चदशं तथा । मात्स्यञ्च गारुड़ञ्चैव ब्रह्माण्डमष्टादशं तथा" हेमा०दा०ख०वरा०पु० ।

**अष्टादशभुजा** स्त्री अष्टादश भुजायस्याः । देवीमाहात्म्यस्य द्वितीयचरितदेवतायां महालक्ष्म्यां तन्मूर्त्तिर्ध्यानशब्दे वक्ष्यते

**अष्टादशविद्या** स्त्री ब०व० कर्म्म० संज्ञात्वान्न द्विगुः । वेदादिषु अष्टादशसु विद्यासु । "अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः । धर्मशास्त्रं पुराणञ्च विद्याह्येताश्चतुर्द्दश । आयुर्वेदो धनुर्वेदो गान्धर्व्वश्चेति ते त्रयः ।